अनुक्रमाङ्कः : ......................................

कूट सं. : 8-21-22SAS–A

| |
|---|
| कृपया जाँच कर लें कि इस प्रश्न-पत्र में कुल 21 प्रश्न हैं और कुल 12 पृष्ठ हैं। |

# कक्षा-आठवीं
# संस्कृतम्
# वार्षिकी परीक्षा

**निर्धारितावधिः - होरात्रयम्** **सम्पूर्णाङ्काः - ८०**

**निर्देशा :**

(i) अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।

(ii) 'अ'-भागः बहुविकल्पात्मकः अस्ति।

(iii) 'आ'-भागः वर्णनात्मकः अस्ति।

(iv) प्रश्नानाम् उत्तराणि उत्तरपुस्तिकायाम् एकस्मिन् स्थाने क्रमेण लेखनीयानि।

(v) प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(vi) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

(vii) प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

**प्रश्नपत्रस्वरूपम्-**

| | |
|---|---|
| 'अ'-भागः (बहुविकल्पात्मकः) | 40 अङ्काः |
| 'आ'-भागः (वर्णनात्मकः) | 40 अङ्काः |

## 'अ'-भागः (बहुविकल्पात्मकः प्रश्नाः) (40 अङ्काः)

### (अनुप्रयुक्तव्याकरणम्)

1. **अधोलिखितवाक्येषु रेखाङ्कितपदानां सन्धिपदं सन्धिच्छेदपदं वा चित्वा लिखत। (केवलं प्रश्नत्रयम्)**

**1×3=3**

(i) छात्राः पुस्तक + आलये पत्रिकां पठन्ति।

(क) पुस्तिकालयः (ख) पुस्तकलये (ग) पुस्तकालये

(ii) विक्रम + उर्वशीयं कालिदासस्य रचना अस्ति।

(क) विक्रमर्वशीयम् (ख) विक्रमोर्वशीयम् (ग) विक्रमावशीयम्

(iii) यथा अध्यापकः कथयति तथैव छात्राः कुर्वन्ति।

(क) तथ + एव (ख) तथा + एव (ग) तथै + व

(iv) कार्यक्रमे अतिथीनां स्वागतम् भवति।

(क) सु + आगतम् (ख) स्व + गतम् (ग) स्वा + आगतम्

2. **प्रदत्तेभ्यः विकल्पेभ्यः समुचितं शब्दरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत। (केवलं प्रश्नचतुष्टयम्)**

**1×4=4**

(i) महिलाः ______________ जलम् आनयन्ति।

(क) नदी (ख) नद्याः (ग) नद्याम्

(ii) वृक्षेषु मधुराणि ______________ सन्ति।

(क) फलात् (ख) फलानाम् (ग) फलानि

(iii) पुत्र! ______________ फलानि आनय।

(क) साधुना (ख) साधुभ्यः (ग) साधवः

(iv) ______________ देशस्य प्रधानमंत्री श्रीनरेन्द्रमोदी अस्ति।

(क) अस्माकम् (ख) माम् (ग) मह्यम्

(v) ______________ गृहे अध्यापिका छात्रान् पाठयति।

(क) तत (ख) तस्मिन् (ग) तस्मात्

3. **अधोलिखितवाक्येषु सङ्ख्यास्थाने उपयुक्त सङ्ख्यावाचकं संस्कृतपदं विकल्पेभ्यः चित्वा लिखत– (केवलं प्रश्नत्रयम्)** **1×3=3**

(i) संस्कृते अहम् ______________ अङ्कान् प्राप्तवान्। (80)

(क) अष्टादश (ख) अशीतिः (ग) अष्टसप्ततिः

(ii) कालिदासेन ______________ नाटकानि रचितानि। (3)

(क) त्रयः (ख) तिस्रः (ग) त्रीणि

(iii) कक्षायाः ______________ छात्राः स्वच्छताकार्यक्रमे भागं गृहीतवन्तः। (25)

(क) पञ्चविंशतिः (ख) द्वाविंशतिः (ग) द्विपञ्चाशत्

(iv) वैदिकसाहित्ये प्रमुखाः ______________ उपनिषदः सन्ति। (10)

(क) दशम् (ख) दश (ग) दशान्

4. **रेखाङ्कितपदेषु प्रयुक्तां विभक्तिं तत्कारणं च प्रदत्तविकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)** **1×4=4**

(i) ऋद्धिः <u>क्रीडायां</u> निपुणा अस्ति।

(क) तृतीया, 'निपुणा' इति योगे (ख) सप्तमी, 'निपुणा' इति योगे

(ग) तृतीया 'ऋद्धिः' इति योगे

(ii) <u>मह्यं</u> संस्कृतं रोचते।

(क) द्वितीया, 'संस्कृतम्' इति योगे (ख) पञ्चमी 'रुच्' इति योगे

(ग) चतुर्थी, 'रुच्' इति योगे

(iii) <u>जलं</u> विना जीवनम् असम्भवम्।

(क) पञ्चमी, 'विना' इति योगे (ख) द्वितीया, 'विना' इति योगे

(ग) द्वितीया, 'जीवनम्' इति योगे

(iv) <u>वृक्षस्य</u> उपरि काकः शुकः चटका च तिष्ठन्ति।

(क) षष्ठी, 'उपरि' इति योगे (ख) तृतीया, 'उपरि' इति योगे

(ग) पञ्चमी, 'काकः' इति योगे

(v) केचन मन्त्रिणः मन्त्रिमण्डलात् बहिः अगच्छन्।

(क) द्वितीया 'बहिः' इति योगे (ख) तृतीया, 'मन्त्रिणः' इति योगे

(ग) पञ्चमी, 'बहिः' इति योगे

**5. प्रदत्तेभ्यः विकल्पेभ्यः समुचितं धातुरूपं चित्वा वाक्येषु रिक्तस्थानानि पूरयत। (केवलं प्रश्नचतुष्टयम्)** **1×4=4**

(i) ह्यः वयं दूरदर्शने वार्तावलीम् __________ ।

(क) अपश्यत् (ख) अपश्यताम् (ग) अपश्याम

(ii) युवां शीघ्रं पाठं __________।

(क) स्मरतः (ख) स्मरतम् (ग) स्मरति

(iii) सर्वे छात्राः योगाभ्यासं __________।

(क) कुर्युः (ख) कुर्यात् (ग) कुर्याम

(iv) शिष्यः गुरुं __________।

(क) सेवन्ते (ख) सेवेते (ग) सेवते

(v) श्वः त्वं पाठं __________।

(क) अपठः (ख) पठसि (ग) पठिष्यसि

**6. रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नत्रयम्)** 1×3=3

(i) मूषकाः श्रृगालं नम् + क्त्वा परस्परं वदन्ति।

(क) नतवान् (ख) नन्तुम् (ग) नत्वा

(ii) मूषकाः प्रतिदिनं श्रृगालं सेवितुम् आगच्छन्ति स्म।

(क) सेव् + तुमुन् (ख) सेवि + तुम् (ग) सेव् + क्त्वा

(iii) राजा पारितोषिकं प्र + दा + ल्यप् प्रसन्नः भवति।

(क) प्रदातुम् (ख) प्रदाय (ग) प्रदानम्

(iv) छात्रा पञ्चतन्त्रस्य कथां पठितवती ।

(क) पठ् + वती (ख) पठ् + क्त्वा (ग) पठ् + क्तवतु

**7. अधोलिखितवाक्येषु रिक्तस्थानेषु प्रदत्तविकल्पेभ्यः उचितम् अव्ययपदं चित्वा लिखत। (केवलं प्रश्नद्वयम्) 1×2=2**

(i) ईश्वरः ___________ अस्ति।

(क) कुत्र (ख) ह्यः (ग) सर्वत्र

(ii) कुक्कुराः मार्गेषु ___________ भ्रमन्ति स्म।

(क) इतस्ततः (ख) श्वः (ग) तदा

(iii) त्वम् ___________ मम प्रियमित्रम् असि।

(क) अलम् (ख) अपि (ग) उच्चैः

**8. रेखाङ्कितपदेषु उपसर्गं संयोज्य विभज्य वा शुद्धम् उत्तरं विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नद्वयम्) 1×2=2**

(i) अध्यापकः छात्रान् <u>आदिशति</u> ।

(क) आदि + शति (ख) आ + दिशति (ग) आदि + शति

(ii) शिष्यः पाठस्य <u>अभि + ज्ञानं</u> करोति।

(क) अभिजानम् (ख) अभिज्ञानम् (ग) अभीज्ञानम्

(iii) महर्षिः <u>उपदेशं</u> करोति।

(क) उप + देशम् (ख) उप + दिशम् (ग) उप + आदेशम्

**(पठित-अवबोधनम्)**

**9. रेखाङ्कितपदानि आधृत्य समुचितं प्रश्नवाचकपदं चित्वा लिखत। (केवलं प्रश्नपञ्चकम्) 1×5=5**

(i) सन्मित्रं <u>पापात्</u> निवारयति।

(क) केषाम् (ख) कस्मात् (ग) काम्

(ii) <u>सत्सङ्गतिः</u> पापम् अपाकरोति।

(क) का (ख) कस्य (ग) किमर्थम्

(iii) <u>चटकायाः</u> गृहं नष्टम् अभवत्।

(क) केन (ख) के (ग) कस्या

(iv) मम तटेषु <u>ऋषयः</u> तपस्यां कुर्वन्ति।

(क) कुत्र (ख) के (ग) कस्य

(v) <u>रामायणम्</u> वाल्मीकेः रचना अस्ति।

(क) कः (ख) कैः (ग) किम्

(vi) महर्षिः दयानन्दः <u>वेदप्रचाराय</u> भारते सर्वत्र अभ्रमत्।

(क) कदा (ख) किमर्थम् (ग) कुत्र

**10. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितम् अर्थं चित्वा लिखत। (केवलं प्रश्नचतुष्टयम्)**

(i) <u>अधमाः</u> धनम् इच्छन्ति। 1×4=4

(क) नीचजनाः (ख) उत्तमजनाः (ग) मध्यमजनाः

(ii) <u>विद्या</u> ददाति विनयम्।

(क) अज्ञानम् (ख) ज्ञानम् (ग) मूर्खता

(iii) गुणी गुणं <u>वेत्ति</u> ।

(क) जानाति (ख) गुणवान् (ग) पठति

(iv) अर्धः घटः नूनम् उपैति <u>घोषम्</u> ।

(क) गच्छति (ख) शब्दम् (ग) भोजनम्

(v) महात्मा <u>सहजरूपेण</u> तस्य निमन्त्रणं स्वीकृतवान्।

(क) समानरूपेण (ख) कठिनतया (ग) सरलतया

**11. भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत। (केवलं प्रश्नषट्कम्)**
**1×6=6**

(i) ''तौ एकस्मिन् वृक्षे निर्मितम् एकं सुन्दरं गृहम् अपश्यताम्'' अस्मिन् वाक्ये 'गृहम्' इत्यस्य विशेषणपदं किम्?

(क) वृक्षे (ख) सुन्दरम् (ग) अपश्यताम्

(ii) ''अहं सर्वदा गतिशीला अस्मि'' अस्मिन् वाक्ये क्रियापदं किं प्रयुक्तम्?

(क) गतिशीला (ख) अहम् (ग) अस्मि

(iii) ''महर्षिः दयानन्दः तेषु प्रमुखः आसीत्'' अत्र 'आसीत्' इति क्रियापदस्य कर्तृपदं किम्?

(क) दयानन्दः (ख) तेषु (ग) आसीत्

(iv) ''उत्तमाः मानम् इच्छन्ति'' अस्मिन् वाक्ये 'सम्मानम्' इत्यस्य किं पर्यायपदं प्रयुक्तम्?

(क) मानम् (ख) इच्छन्ति (ग) उत्तमाः

(v) 'संस्कृतभाषा विश्वस्य प्राचीनतमा भाषा अस्ति' अस्मिन् वाक्ये 'प्राचीनतमा' इत्यस्य किं विशेष्यपदं प्रयुक्तम्?

(क) विश्वस्य (ख) अस्ति (ग) भाषा

(vi) ''स्वयं न खादन्ति फलानि वृक्षाः'' अस्मिन् वाक्ये क्रियापदं किम्?

(क) वृक्षाः (ख) स्वयम् (ग) खादन्ति

(vii) ''क्रोधेन कार्यं न सिध्यति'' अस्मिन् वाक्ये 'शान्त्या' इत्यस्य किं विलोमपदं प्रयुक्तम्?

(क) सिध्यति (ख) क्रोधेन (ग) कार्यम्

(viii) ''न धर्मवृद्धेषु वयः समीक्ष्यते'' अस्मिन् वाक्ये अव्ययपदं किम्?

(क) न (ख) वयः (ग) समीक्ष्यते

**'आ' भागः (वर्णनात्मकाः प्रश्नाः) (40 अङ्काः)**

**(अपठित-अवबोधनम्)**

**12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–** 10

भारतीयसंस्कृतौ मानवजीवनस्य चत्वारः भागाः भवन्ति। प्रथमः अध्ययनकालः, द्वितीयः गृहस्थकालः, तृतीयः वानप्रस्थकालः चतुर्थः च संन्यासकालः कथ्यते। एते चत्वारः आश्रमाः अपि कथ्यन्ते। एतेषु अध्ययनकालः 'ब्रह्मचर्याश्रमः' इति नाम्ना अपि प्रसिद्धः अस्ति। अस्मिन् आश्रमे बालाः नियमपूर्वकं ग्रन्थानाम् अध्ययनं कुर्वन्ति। तस्य एकम् एव उद्देश्यं भवति–ज्ञानार्जनम्। मूलतः अयं कालः सम्पूर्णजीवनस्य आधारशिलास्वरूपः भवति। यदि छात्रः नियमानुशासनपूर्वकं विविधानां ग्रन्थानां विषयाणां वा अध्ययनं कालेऽस्मिन् करोति, तर्हि तस्य भाविजीवनं सुखमयं समृद्धं ज्ञानालोकेन प्रकाशितं च भवति। ज्ञानं विना मनुष्यस्य जीवनम् अन्धकारमयं भवति। जीवने यः कोऽपि सफलतां प्राप्तवान्, तेन छात्रजीवने महता परिश्रमेण अध्ययनं कृतम्, वस्तुतः ज्ञानं सफलतायाः कुञ्जिका अपि कथयितुं शक्यते।

**(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)** 1×2=2

(i) मानवजीवनस्य कति भागाः सन्ति?

(ii) अध्ययनकालस्य द्वितीयं नाम् किम्?

(iii) किं विना मनुष्यस्य जीवनं अन्धकारमयं भवति?

**(आ) पूर्णवाक्येन उत्तरत– (केवलं प्रश्नद्वयम्)** 2×2=4

(i) कः कालः आधारशिलास्वरूपः भवति?

(ii) ज्ञानं कस्याः कुञ्जिका कथ्यते?

(iii) मानवः सफलतां कथं प्राप्नोति?

**(इ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत।** 1×1=1

**(ई) निर्देशानुसारम् उत्तरत– (केवलं प्रश्नत्रयम्)** 1×3=3

(i) ''आश्रमे बालाः नियमपूर्वकं ग्रन्थानाम् अध्ययनं कुर्वन्ति।'' अत्र 'कुर्वन्ति' इति क्रियापदस्य कर्तृपदं किम् अस्ति?

(ii) ''मानवजीवनस्य चत्वारः भागाः भवन्ति''। अत्र 'चत्वारः' इत्यस्य विशेष्यपदं किम् अस्ति?

(iii) 'दुःखमयम्' अस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम्?

(iv) ''एते चत्वारः आश्रमाः अपि कथ्यन्ते''। अस्मिन् वाक्ये क्रियापदं किम् अस्ति?

**(रचनात्मककार्यम्)**

**13. मित्रं प्रति लिखिते पत्रे मञ्जूषातः उचितपदानि चित्वा रिक्तस्थानानि पूरयत, पूर्णं पत्रं च उत्तरपुस्तिकायां लिखत–** **½×10=5**

प्रियमित्र अंशरञ्जन!

सप्रेम (i) ....................

अत्र सर्वं (ii) ........................ अस्ति। तत्रापि कुशलम् भवेत्। अद्यैव अहं भवतः (iii) ......................... प्राप्तवान्। पत्रेण मया अवगतं यत् भवान् (iv) ....................... अष्टनवतिः प्रतिशतम् अङ्कान् प्राप्य उत्तीर्णः अभवत्। संस्कृतविषये तु भवान् (v) ......................... अङ्कान् लब्धवान्। मित्र! मत्पक्षतः कोटिशः (vi) ....................... स्वीकरोतु। एतत् तु भवतः (vii) .......................... एव फलम् अस्ति। ईश्वरः

अग्रे इतोऽपि अधिकां सफलतां भवते यच्छतु इति एषा मम (viii) .......................। पितृभ्यां (ix) ...................... प्रणामान् निवेदयतु अनुजेभ्यः स्नेहं प्रदर्शयतु।

भवतः प्रियमित्रम्

(x) ..........................

**मञ्जूषा**

| |
|---|
| शतम्, मम, रजतः, अष्टमकक्षायाम्, नमोनमः, प्रार्थना, परिश्रमस्य, कुशलम्, वर्धापनानि, पत्रम् |

**14. चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया संस्कृतेन पञ्चवाक्यानि लिखत– 1×5=5**



**मञ्जूषा**

| |
|---|
| जन्तुशालायाः, सुन्दरम्, तरतः, बाला, शोभनानि, सिंहः, चित्रे, व्याघ्रः, वर्तकौ, अस्ति, हरति, वानरः, वृक्षः, अस्मिन् |

**अथवा**

मञ्जूषायां प्रदत्तशब्दानां सहायतया 'मम विद्यालयः' इति विषयम् अधिकृत्य पञ्चभिः संस्कृत-वाक्यैः एकम् अनुच्छेदं लिखत–

**मञ्जूषा**

| |
|---|
| नाम, विशालः, विद्यालयस्य, अध्यापिकाः, प्रधानाचार्यः, मित्राणि, वातावरणम्, उत्तमः, व्यवहारः, अस्ति, भवति, पाठयन्ति, सुन्दरम्, अस्माकम्, रोचते, बहु |

**15. अधोलिखितानि वाक्यानि संस्कृतभाषया अनुवादं कृत्वा लिखत। (केवलं पञ्चवाक्यानि) 1×5=5**

| | |
|---|---|
| (i) हम लोग नाटक करेंगे। | (i) We will play (Drama). |
| (ii) मेरे पिता जी कार्यालय गए। | (ii) My father went to the office. |
| (iii) तुम संस्कृत का गृहकार्य करो। | (iii) You do homework in Sanskrit. |
| (iv) राधिका कहाँ पढ़ती है? | (iv) Where does Radhika study ? |
| (v) अब तुम (सब) को जाना चाहिए। | (v) Now you all must go. |
| (vi) हम दोनों साधु को प्रणाम करते हैं। | (vi) We both salute the sadhu (saint). |
| (vii) अध्यापक कक्षा की ओर जाते हैं। | (vii) Teachers go to classrooms. |

**(पठित-अवबोधनम्)**

**16. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

काकः वृक्षे मृत्तिकया सुन्दरं गृहं निर्मितवान्। चटका तृणैः स्वगृहं निर्मितवती। एकदा भीषणे ग्रीष्मकाले सर्वत्र शुष्कम् अभवत्। सर्वे दुखिनः आसन्। चटकायाः गृहम् अपि नष्टम् अभवत्। सा खिन्ना आसीत्। सा चिन्तयति–"किं करोमि?" परन्तु काकस्य गृहं न नष्टम्। तत् तु मृत्तिकायाः आसीत्। चटका चिन्तयित्वा काकस्य गृहं गच्छति। चटका काकं कथयति–"भ्रातः! अस्मिन् भीषणे ग्रीष्मकाले मम गृहं नष्टम् अभवत्। सर्वत्र उष्णः अस्ति। मह्यं स्वगृहे शरणं यच्छ।"

**(अ) एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्)** ½×2=1

(i) चटका कं कथयति?

(ii) चटकायाः गृहं कदा नष्टम् अभवत्?

(iii) के दु:खिनः आसन्?

**(आ) पूर्णवाक्येन उत्तरत–(केवलं प्रश्नद्वयम्)** 1×2=2

(i) काकः वृक्षे कया सुन्दरं गृहं निर्मितवान्?

(ii) कदा सर्वत्र शुष्कम् अभवत्?

(iii) चटका काकं किं कथयति?

**17. अधोलिखितं श्लोकं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

क्षुधासमं नास्ति शरीरपीडनम्,
चिन्तासमं नास्ति शरीरशोषणम्।
विद्यासमं नास्ति शरीरभूषणम्,
क्षमासमं नास्ति शरीररक्षणम्।।

**(अ) एकपदेन उत्तरत–(केवलं प्रश्नद्वयम्)** ½×2=1

(i) क्षुधासमं किं नास्ति?

(ii) शरीरशोषणं कया समं नास्ति?

(iii) क्षमासमं किं नास्ति?

**(आ) पूर्णवाक्येन उत्तरत–(केवलं प्रश्नद्वयम्)** 1×2=2

(i) शरीरपीडनं कया समं नास्ति?

(ii) विद्यया समं किं नास्ति?

(iii) किं चिन्तासमं नास्ति?

**18. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि संस्कृतेन लिखत–**

सुमेधा – संस्कृतभाषायाः कति रूपाणि सन्ति?

प्रबुद्धः – संस्कृतभाषायाः द्वे रूपे स्तः। एकं वैदिकं संस्कृतम् द्वितीयं च लौकिकं संस्कृतम्।

प्रणवः – वैदिकसंस्कृतस्य किं प्रमुखं साहित्यम् अस्ति?

निष्ठा – चत्वारः वेदाः, ब्राह्मणग्रन्थाः, आरण्यक-ग्रन्थाः, उपनिषदः च वैदिकं साहित्यं कथ्यते।

सुमेधा – लौकिकसंस्कृतस्य आरम्भः कदा अभवत्?

विवेकः – वाल्मीकेः कालात् लौकिकसंस्कृतस्य प्रारम्भः मन्यते। अस्य कृतिः 'रामायणं' लौकिकसंस्कृतस्य आदिमः ग्रन्थः अस्ति।

**(अ) एकपदेन उत्तरत–(केवलं प्रश्नद्वयम्)** ½×2=1

(i) संस्कृतभाषायाः कति रूपाणि सन्ति?

(ii) लौकिकसंस्कृतस्य आदिमः ग्रन्थः कः अस्ति?

(iii) कति वेदाः सन्ति?

**(आ) पूर्णवाक्येन उत्तरत–(केवलं प्रश्नद्वयम्)** 1×2=2

(i) लौकिकसंस्कृतस्य प्रारम्भः कदा मन्यते?

(ii) वैदिकसंस्कृतस्य किं प्रमुखं साहित्यम् अस्ति?

(iii) संस्कृतभाषायाः के द्वे रूपे स्तः?

**19. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितस्य श्लोकस्य अन्वयं लिखत–** **½×4=2**

अधमा धनमिच्छन्ति धनं मानं च मध्यमाः।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम्।।

अन्वयः – अधमाः (1) ...................... इच्छन्ति, (2) ..................... धनं मानं च (इच्छन्ति)। उत्तमाः मानम् (3) ......................, मानः हि (4) ..................... धनम् (भवति)।

**मञ्जूषा**

| इच्छन्ति, महताम्, धनम्, मध्यमाः |
|---|

**20. मञ्जूषातः समुचितपदानि चित्वा अधोलिखितसूक्तेः भावार्थं पूरयित्वा लिखत–** **½×4=2**

सूक्तिः – जननी जन्मभूमिश्च स्वर्गादपि गरीयसी।

भावार्थः – जन्मभूमिः (1) ...................... इव अस्ति। (2) ..................... माता इव जनान् पालयति। अस्याः (3) ........................ स्वर्गात् अपि उच्चतरम् (4) ....................।

**मञ्जूषा**

| जन्मभूमिः, स्थानम्, अस्ति, माता |
|---|

**21. अधोलिखित-कथांशं समुचितक्रमेण पुनः उत्तरपुस्तिकायां लिखत–** **½×4=2**

(1) अन्ते यात्री महर्षिं क्षमाम् अयाचत।

(2) महर्षिः सर्वं श्रुत्वा शान्तमनसा तिष्ठति स्म।

(3) महर्षिः दयानन्दः वेदधर्मस्य प्रचाराय भारते सर्वत्र अभ्रमत्।

(4) गङ्गायाः तटे महर्षेः कुटीरस्य समीपे एकः यात्री अपि अवसत्, सः महर्षिं दुर्वचनानि कथयति स्म।

❒❒❒